स्त्रीप्रायः परदारसंग्रहविधौ तद्वृत्परावर्जने
संपद्येत समीक्षणेऽपि विकलः पापैर्विवेकादिभिः॥

अतएव अस्माभिरपि परित्यक्तसौभ्रात्रैः तेऽपि दुरात्मानो जिघांस्यन्ते। ततः प्रवृत्तिनिवृत्तिपद्धती समाश्रित्य वयं च ते च संयतिष्यामहे। तदा तु सत्त्वप्रधानं कुलं ज्योतिरिङ्गणज्योतिरिव द्युमणिकिरणैरस्माभिरभिभूयते।

रतिः — शान्तं पापम्। शान्तं पापम्। पुत्राः पितुः भोगं विनाशयान्ति। तथा कथं सोदरा एव इतरेतरविध्वंसनलम्पटहृदया भवन्ति? नाथ! किं न भवेत्तेषां युष्माकमपि समरदुर्दशानिवारणसाधनं सन्धिः।

कामः — मुग्धे! कथमपि नात्र सन्धिः सम्भाव्यते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सतः सत्त्वविहीनानां सत्तयैवापराध्यतः ।
कथंकारं प्रतीकारः कल्पकोटिशतैरपि ॥२३॥

रतिः — किं पुनस्तैः कृतघ्नैः महाबलानां युष्माकमप्युन्मूलने उपायस्संमन्त्रितः ? नाथ किं विवेकस्य नास्ति विवेकः अथवा अमात्यानां शमदमादीनाम् ?

कामः — अयि भीरु ! अनुद्घाटनीयमिदं राजरहस्यं विशेषतः स्त्रीषु ।

रतिः — शापितोऽस्मि मया प्रियसखेन वसन्तेन च । सत्यं विव्रियतां राजरहस्यम् ।

कामः — प्रिये ! कथयामि तर्हि । अस्ति किल कैश्चिन्निष्ठुरैरनुष्ठीयमानो निवृत्तिसंज्ञको धर्मः । यन्निष्ठस्य पुरुषस्य परदोषदर्शनादिषु अन्धबधिरषण्डपङ्गुमूकादिवदत्यंतमवसन्नावस्थानमाकर्ण्यते । तेन निष्प्रतिक्रियेण केनचिदवग्रहेणैव पुरुषमाविशता बुद्धिः सङ्गम्स्यते । तत्सङ्गमाद्भवसागरभैमरथीपरभक्त्यपरपर्याया ब्रह्मराक्षसी प्रादुर्भवति । ततश्च —

प्रव्रज्यादियुता परत्र पुरुषे पातिव्रतीं बिभ्रती
भक्तिः सा प्रतिरुद्धसर्वकरणा घोरं तपस्तप्यते ।
तुष्टा येन जनार्दनस्य करुणा कुर्वीत तात्किङ्करं
कश्चित् कैटभकोटिकल्पमसुरं ..... (इत्यर्धोक्ते)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वसन्तः --- (स्वगतम्) स खलु संकल्पसूर्योदयः ।

निर्मूलनस्त्वेष नः

इति शेषः । अन्यथा तु पूरयामि –

शेषं पुनर्दुर्वचम् ॥

रतिः --- नाथ! परिरक्ष, परिरक्ष ।

कामः --- मा भैषीः, समाश्वसिहि समाश्वसिहि । (नेपथ्ये कलकलः) प्रिये, मोहपरिपन्थिपक्षे मूर्धाभिषिक्तः स्वयमसौ सहधर्मचारिण्या सुमत्या सहाभ्यमित्रीण उपसर्पति । तन्न सांप्रतमस्माभिरवाप्तसमयैरसहायैश्चारातिसन्निधौ आत्मानं प्रकाशयितुम् ।

(एहि गच्छावः)



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्यम् ३

(ततः प्रविशति राजा विवेकः सुमतिश्च)

विवेकः — प्रिये! समाकर्णितः त्वया कन्दर्पवटोराटोपः। यदसावशेषपापनिष्कृतौ प्रवर्तमानानस्मानेव पापारोपेण परिवदति अथवा—

पश्यति परेषु दोषानसतोपि जनः सतोपि नैव गुणान्।
विपरीतामिदं स्वस्मिन् महिमा मोहाञ्जनस्यैषः ॥२५॥

सुमतिः — आर्यपुत्र! विरूपाः खलु जना निजमुखे दोषं निर्मलेष्वपि दर्पणेषु समर्पयन्ति।

विवेकः — सत्यमेतत् यथार्थदर्शिनी यथादृष्टार्थवादिनी च भवती। प्रिये! पश्य। निर्विकारपुरुषपीडया क्रीडन्त एते कामक्रोधलोभादयः।

सुमतिः — आर्यपुत्र! कथं सः नित्यनिर्मलमहानन्दस्वयंप्रभः सर्वजनदर्शनयोग्यस्वभावः पुरुषः महामोहेन मानमदमत्सरप्रमुखैः दुर्विनीतैः दुःखसागरे निक्षिप्तः?

विवेकः — श्रूयताम्—

स्वतः प्राप्तं रूपं यदिह किल भावेषु तदपि
त्यजन्तस्ते दृष्टा मियतिघटितोपाधिवशतः।

Funding by IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकृत्या तिष्ठन्ति ह्युपधिविगमे ते च तदसा-
वनादिः संसारः पुरुषमुपरुन्धे गलति च ॥२६॥

वयं पुनः तमेव पुरुषं निश्रेयसे योजयितुं समस्तजन-सांसिद्धिकसुहृदो भगवतः दयादृष्टिमावहन्तः प्रवृत्ताः; पश्य! त्वया सह निर्वर्तनीयं परानुग्रहव्रतम्।

सुमतिः — अद्य खलु देवानां मुनीनामपि परावरपुरुषवेदने डोलायते चिन्ता, त्वया पुनः कथमेकस्मिन् पुरुषोत्तमे निष्ठा नियम्यते ?

विवेकः — प्रिये! सूक्ष्मदर्शिनि! पश्यतु भवती----

शास्त्राण्यालोड्य सर्वाण्यशिथिलगतिभिर्युक्तिवर्गैर्विचार्य
स्वान्तर्निर्धार्य तत्त्वं स्वभुजमपि महत्युद्धरन् सूरिसङ्घे।
सत्यं सत्यं च सत्यं पुनरपि कथयन् सादरं वेदवादी
पाराशर्यः प्रमाणं यदि क इह परः केशवादाविरस्ति॥

महाजनो येन गतस्स पन्थाः इति महर्षिभाषितम्।

सुमतिः — अनुत्तरमेतदुत्तरम्।

विवेकः — साधु चिन्तितं तदिदं संदर्शयामि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परः पद्माकान्तः प्रणिपतनमस्मिन् हिततमं
शुभस्तत्सङ्कल्पश्चुलकयति संसारजलधिम् ।
झटित्येवं प्रज्ञामुपजनयता केनचिदसौ
अविद्यावेताळीमतिपतति मन्त्रेण पुरुषः ॥२८॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्यम् ४

(ततः प्रविशति रागः)

रागः — सखे! त्वत्सहायस्य मे स्वामिकार्यनिर्वर्तनं सिद्धप्रायमिति निश्चिनोमि।

द्वेषः — वयस्य! त्वद्विरुद्धविवेकसंरम्भानुरोधेन त्वदेककार्य एव ह्यादिष्टोऽस्मि महाराजेन।

रागः — सखे! सम्भवन्ति च सर्वथा सर्वतः प्रसारिताभ्यां स्वर्गापवर्ग गुणदोषजालाभ्यां तयोरुपरोधः, अहं पुनः मायासहस्रवेदी मारीचमैथिलीन्यायेन विरक्तिं तावत्तपस्विनीं विप्रलभे, भवतस्तु विष्णुभक्तिमथने पौलस्त्य एव प्रमाणम्।

द्वेषः — अथ किं?

सर्वाधारः कथं नु स्यात्सर्वदोषविवर्जितः
तथैव सर्वकामार्थी निरपेक्षः कथं प्रभुः ॥२९॥

रागः —

अल्पमस्थिरमानन्दमिच्छतो यदि रागिता।
अनन्तस्थिरकामस्य विरक्तिः कस्य कीदृशी ॥३०॥

(उभौ कर्णं दत्वा ससम्भ्रमम्)

उभौ — आः कष्टमापतितम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतिक्रम्य दुरच्छेदामास्माकीं गुणवागुराम् ।
विरक्तिर्विष्णुभक्तिश्च विवेकस्थानमृच्छतः ॥३१॥

सचैषो नूनं विरक्तिविष्णुभक्तिभ्यां प्रोत्साहितः देव्या सुमत्त्वा दत्तहस्तः इतो अभिसमेति, जितकाशिनश्च अमुष्य सन्निधानं नास्माभिः स्थातव्यम् । "जीवन्तो हि भद्राणि पश्यान्ति ।"

(इति निष्क्रान्तौ)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्यम् ५

(ततः प्रविशति विवेको सुमतिश्च)

विवेकः — देवि ! समाश्वसिहि समाश्वसिहि । परप्रयुक्तपाटच्चर-भयापनोदनेन विरक्तिविष्णुभक्ती त्वत्सकाशं प्रापिते ।

सुमतिः — नाथ ! तथापि अद्यापि किं भवेदिति तरलहृदया किं भणामि ? प्रच्छन्नवैरिणौ खलु रागद्वेषौ अवसरं प्रतीक्षेते ।

विवेकः — भीरु ! मातेऽभूदिह मनोदौर्बल्यम् ।

अनुचितपदवीभिश्चिन्तयित्वा प्रयातान्
अलमलमतिमात्रैरद्य बाले विषादैः ।
उपनिषदमुदारामुद्गमन्कापि लक्ष्ये
शरणमुपगतान्नस्त्रायते शार्ङ्गधन्वा ॥३२॥

सुमतिः —

सर्गेषु प्रतिसञ्चरेषु बहुषु स्वर्गे तथा दुर्गतौ
जाग्रत्स्वप्नसुषुप्तिमुग्धमरणावस्थासु दुःस्थासु च ।
दुःख्यन्प्रस्तरवद्भवन्बहुपशुः सुख्यन्नसौ देहभृत्
दग्धादग्धसजीवितद्रुमदशा दीनो दरीदृश्यते ॥३३॥

विवेकः — सत्यमिदमितः पूर्वमपि [illegible] पुनः —

Digitized by Siddhanta eGangotri Gyaan Kosha

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बहुजन्मसुकृतसिद्धं ब्रह्मविदपचारदूरगं पुरुषम् ।
अभिसरति नित्यसत्वा सत्वरमपवर्गसाधनी विद्या ॥

सुमतिः — युक्तमेतत्, तथापि प्रत्यक्षितपरमार्थं त्वामेव पृच्छामि । केन पुनर्विनिपातेन निर्मलगुरुसकाशनिर्धारितनिगमान्त-हृदयानामप्रमादपरिगृहीतनिवृत्तिधर्माणामसंभावितप्रत्यूहाना-मपि महापुरुषाणां मोक्षोपायः शीघ्रं न सम्पद्यते ।

विवेकः — प्रिये ! आकर्ण्यतामेतदवहितया भक्त्या—

तिमिं किल तिमिङ्गिलो गिलति तद्गिलस्तं तथा
तमप्यथ च तद्गिलस्तदिह पश्य कर्मक्रमे ।
समस्तवृजिनोदधिग्रसनडम्भकुम्भोद्भवम्
निवृत्तिमपि धर्ममत्त्यनघतत्त्वविन्निग्रहः ॥३५॥

अन्यदपि एतादृशं अवधारयेथाः—

प्रथितं पातकिवर्गं कृतघ्नमेकोपि कृत्स्नमतिशेते ।
तमिमं क्रियमाणघ्नस्तमपि दुरात्मा करिष्यमाणघ्नः ॥३६॥

सुमतिः — इति नाम निस्समाभ्यधिकमाहात्म्यस्य प्रतिबुद्धजननिग्रहस्य प्रभावो दर्शितः अस्य पुनर्मार्गे नास्ति परिहारः ?

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विवेकः — अस्ति कश्चिदेकः । यदिह पुनस्तत्प्रसादनम् । तेन—

परभक्तिरप्रकम्प्या निवृत्तिधर्मानुबन्धिगुणबन्धैः ।
भवजलधिपोतपात्री जाता वृद्धिं दिने दिने भजति ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्यम् ६

(नेपथ्ये वैताळिकौ)

कामः —

इक्षुः पेशलमीदृशं मम धनुः पुष्पाण्यमी सायकाः
तन्त्रीमञ्जुलनिःस्वना मधुकरश्रेणी शुभा शिञ्जिनी ।
भीरुस्सन्नबलाजनो मम बलं तथ्यं परं कथ्यते
सोऽहं निर्जितशूलभृत्प्रभृतिकः सङ्कल्पसिद्धोदयः ॥३८॥

सखे !

त्वयि संभृतशस्त्रास्त्रे सहाये मयि संस्थिते ।
महता पश्य मोहेन विश्वमेकातपत्रितम् ॥३९॥

वसन्तः — किमुच्यते ! कामः खल्वसि ।

(ततः प्रविशति क्रोधः)

क्रोधः — स्वस्ति सुहृदे ! स्वैरसंचारविजितविवेकविभवाय कुसुमधन्वने

अयमहमुद्भटप्रथनचारभटारभटी
नटपतिरुत्थितः कथमुदेतु विवेककथा ।
यदनुविधायिदैत्यभयसंज्वरितासु मुधा
सुरसुभटीपयोधरतटीषु पटीररसः ॥४०॥

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वसन्तः — सखे ! इदमप्यवधारणीयं भवद्भ्याम् ।

शृणोति कथयत्यसौ परिचिनोति संपृच्छते
समर्चयति गायति स्पृशति पश्यति स्तौति च ।
इतीव नियतादरो मुरभिदंघ्रिसेवारसो
न भेत्तुमिह शक्यते स्थिरविवेकदुर्गास्थितः ॥

सखे ! शंबरासुरसूदन ! श्रोतव्यमेतत्सुरभिणा सुहृदा च कामेन ।

जमदग्निमुखान् परित्यजन् परिगृह्णन् दशकन्धरादिकान्
विनिपातितवानुपायतः पुरुषानद्भुतपौरुषानहम् ॥४२॥

वसन्तः — विश्वहृल्लोभनो लोभ इह आकार्यः ।

क्रोधः — सखे ! पश्य,

विजेतुकामः कामं त्वां निष्काम इति का कथा
त्वान्निवर्तननिष्कामः सकामस्त्वय्यनुज्झिते ॥४३॥

कामक्रोधौ – सुष्ठु चिन्तितं सुहृदा ।

(ततः प्रविशति लोभः तृष्णया सह)

लोभः — प्रिये ! तृष्णे !

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अशेषसुरनारीणामाभिरूप्यसमुच्चयैः ।
अजहद्यौव्वनां तृष्णे विदधे त्वां विधिः स्वयम् ॥

तदहं निदर्शयामि ।

कनककलधौतशैलप्रभृतिरपि हन्त ! पूरणे क्षितैः ।
तृष्णे भजति समृद्धिं भूयो भूयस्तवोदरे कार्श्यम् ॥

इदानीं त्र्यम्बकसखस्य तत्र तावत् धनदविरुदाङ्कितस्य मत्कृतामवस्थामाकर्णय—

लब्धं न मुञ्चति विलक्षमतिर्न भुङ्क्ते
धत्ते पुनः पुनरसौ महतीं धनायाम् ।
निद्रारसं न लभते महतां निधीनां
रक्षापिशाच इव संप्रति राजराजः ॥४५॥

कामक्रोधौ – दीर्घायुषौ भूयास्ताम् ।

लोभः — वयस्यौ ! युष्मदवष्टम्भेन सर्वत्र अमोघप्रवृत्तिरस्मि । सुयोधनादिवत् मत्परिगृहीतस्य लोकस्य इदानीमद्वितीयां द्वितीयपुरुषार्थनिष्ठां निवेदयामि ।

क्षुद्रक्षोणिरजःकणस्थिरजुषः क्षुभ्यन्ति पृथ्वीभृतः
तप्येत स्वपदाय कः क्वचिदिति त्रस्यन्त्यमर्त्येश्वराः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भिक्षाकेष्वपि केषुचित् क्वचिदुपक्षिप्तेष्वाधिक्षेपतः
पक्षे दुर्मतिभृत्ययोरिह जगत्तिष्ठत्यसूयेर्ष्ययोः ॥४६॥

अपि च—

अटान्ति हरितो दश स्थपुटयन्ति विश्वम्भरां
पठन्ति धनिनां चटून्परपरिच्छदं बिभ्रति ।
तरन्ति जलधिं प्लवैः समरमारभन्ते मुधा
दुरन्तधनदोहलग्रहिळचेतसो देहिनः ॥४७॥

कामः — समयोचितं समर्थ्यते कालानुवृत्तवेदिना लोभेन । तद्वय-
मिदानीं विवेकविजयाय भिन्नदिक्काः प्रतिष्ठेमहि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्यम् ७

(ततः प्रविशति काञ्चुकीयः)

काञ्चुकीयः —

मनोरथरथारूढो विवेकस्तर्कसारथिः ।
दिदृक्षुः संयमस्थानमितस्समभिवर्तते ॥४८॥

विवेकः — अहो! दुर्विलसितं महामोहस्य ?

विटविदूषकगायकवैशिकैः विषमितेव विभाति वसुन्धरा ।
क्व नु निवेशमुपेत्य परं पदं विमृशता भवितव्यमिह क्षणम्

अपि च, अत्र कतिचिदधिगतकुसीदवृत्तयः कृच्छ्रलब्धधन मुदितकृपणतरमानसाः कीकटाः पुरुषाः ।

न धर्ममनुवर्तन्ते न कामं नापुनर्भवम् ।
अर्थमेकमुपाश्रित्य दुःखमेवोपभुञ्जते ॥५०॥

अये! सूत आहार्यहेतुमुखेनापि अन्ततः सूनृतवादिना निष्प्रतिघवृत्तिना नियमभूयिष्ठेन त्वयासौ मे मनःपूर्वो रथः सुपथा सञ्चरते ।

तर्कः — देव! अहमपि त्वदायत्तप्रसरः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विवेकः — वयं खलु सूत! इदानीं वशीकृतसर्वेन्द्रियस्य पुरुषस्य धारणादिसिद्धिसाधनस्थानमन्वेषयन्तः मेरुशिखरमधिरूढाः (परितः विलोक्य) अये! तिष्ठ तिष्ठ यावदनङ्गविजयिनो भवानीपतेरावासः कलधौतगिरिरवलोक्यते।

विजितमनोभवेन विभुनाधिगतोऽपि सदा
निरुपधिसंयमस्य न पदं कलधौतगिरिः।
गजमुखगण्डशैलघनदानकलिन्दसुता-
लहरिझलंझलाबहलकज्जलकंबलितः ॥५१॥

तर्कः — देव! पश्य गन्धर्वयूथसेवितं गन्धमादनम्।

विवेकः — अयमपि सिद्धैरासेव्यमानो न साधकानामावासः। सारथे! अन्यतो रथं वाहय। (विचिन्त्य)
इह हि लोकः—

प्रलपति घूर्णते स्खलति मुह्यति हुंकुरुते
न च पदवीमुपैति न च धाम न च त्रपते।
विकृतिशतप्रसूतिविषमाशयदोषभुवा
धनमदिरामदेनधमतीव धरावलयम् ॥५२॥

तर्कः — इतस्तर्हि दिव्यतपोवने दीयतां दृष्टिः देवेन।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विवेकः — विजिताक्षतया विज्ञातस्यापि अमुष्य सर्वोत्तरे तपोवने संयम सिद्धिं न श्रद्धदे । इह च—

परिणमति जनानां संविदानन्दरूपा
निखिलमपि विहाय स्निह्यतीवान्तरङ्गम् ।
स्वरपरिणतिचित्तां मूर्च्छनां भूषयद्भिः
श्रुतिसुरभिततन्त्रीझंकृतैः स्वैरगीतैः ॥

अशक्यश्च सन्निधौ परित्यागः संयमारम्भविरोधिनां विषयाणाम् ।

सा काशीति न चाकशीति भुवि सायोध्येति नाध्यास्यते
सावन्तीति न कल्मषादवति सा काञ्चीति नोदञ्चति ।
धत्ते सा मधुरेति नोत्तमधुरां मान्यापि नान्या पुरी
या वैकुण्ठकथासुधारसभुजां रोचेत नो चेतसे ॥५४॥

स्मर्यते च मुनिभिः—

निगृहीतेन्द्रियग्रामो यत्र यत्र वसेन्नरः ।
तत्र तत्र कुरुक्षेत्रं नैमिशं पुष्कराणि च ॥५५॥

संभवन्ति च सर्वत्र श्रेयसामन्तरायाः । शमितव्याश्च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ते सर्वनिर्वोढारमेकमेव शरणमुपगच्छद्भिः ।

अपि च स्वयमेवाह भगवान्—

"मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।" इति

किं च—

पुरुषस्य पुराणस्य पुंसश्च शरणार्थिनः ।
अपृथक्सिद्धयोरेकमदूष्यं स्थानमान्तरम् ॥५६॥

इदमपि सारथे मन्त्रीथाः—

शुद्धाचारतपोवनैकनिरतः प्रज्ञानशैलाश्रयः
पद्माकान्तपदस्पृहासुरनदीनित्याभिषेकोज्वलः ।
अध्यात्मश्रुतिचिन्तनेन तपसा निर्धूतदोषः पुमान्
कस्मै कुत्र गमिष्यति स्थितमिदं कस्मै च निर्देक्ष्यति

तद्वयं शुभाश्रयनिर्धारणेन धारणादिकक्ष्यासु विशदतमां वृत्तिं पुरुषस्य विभावयामः ।



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्यम् ८

(ततः प्रविशति दम्भः)

दम्भः — अहह! रे त्वां धर्मपत्नि कुहने! सम्बोधयामि। त्वं हि मे तारेव बृहस्पतेः अहल्येव गौतमस्यास्पृष्टपुरुषान्तरा क्षणविरहाक्षमा सहधर्मचारिणी।

कुहना — यद्ब्राह्मणेश्वरो भणति। तथापि लज्जामि निर्दिष्टान्नि-दर्शनात्। अरुन्धतीव वसिष्ठस्येति वचनीयं गृहस्वामिना। यदाहं तस्करैः कितवैः ग्रामणीभिः नरेन्द्रामात्यैः पाषण्डिभिः अन्यैरपि तादृशैः प्रार्थिताऽस्मि, तथापि तान् सर्वानपि त्वामेव स्मृत्वा सेवे।

दम्भः — साधु कुहने! साधु (निमित्तं निरूप्य) स्पन्दते दक्षिणं चक्षुर्मम। अद्यैव सुहृत्समागमः संपत्स्यते।

(ततः प्रविशति दर्पः)

दर्पः — अहं किल राज्ञा महामोहेन प्रकृष्टजनतिरस्काराय प्रणिहितः, मम प्रभावेण लोके इदानीं,

संस्काराः परमुत्सवैकवपुषः सन्ध्या विनोदावधिः
सावित्री जनबाधजर्जरतनुः शौचं नटप्रायिकम्।

Funding by IKS-MoE

BVBSSMV
CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्थं मोहमहीपतेरभिमते विश्वं विपर्यस्यतः
कालस्यैष कलेरपेक्षितमत व्यक्तक्रमः प्रक्रमः ॥५९॥

किंच

भिक्षेति शिष्यकुलरक्षणदक्षिणेति
शास्त्रीति शाश्वतमठोपधिकल्पनेति ।
ग्रन्थोपसंग्रहणमूल्यमिति ब्रुवाणाः
सन्यासिनोपि दधते महतीं धनायाम् ॥६०॥



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्यम् ९

-✣-

(ततः प्रविशति संस्कारः)

संस्कारः — अहं खलु अनुभवामुष्यायणः संस्कारनामा देवस्य विवेकस्य शिक्षितसकलविद्यः शिल्पी ।

विदुषश्चिन्तनाशक्त्या चित्रभित्तिं वितन्वता ।
शुद्धाशुद्धविभागार्हं विश्वं विलिखितं मया ॥६१॥

(सर्वतो अवलोक्य) अहह ! सहस्रेष्वपि शिल्पकर्मसु किंचिदेव कदाचिदतिशेते । इह च—

कः कोऽत्र भोः (श्रुत्वा सहर्षं) किमासीदति शिल्पशालां व्यवसायदत्तहस्तः सुमतिसहायो विवेकः ? तदहं यथोचितपरिजनकृत्ये वर्तिष्ये ।

व्यवसायः—इत इतो देवः इयं सा बहिरन्तश्चलंवितामन्दमकरन्दपरिमळमन्दारदामचित्रिता चित्रशाला ।

यत्र च परस्परप्रतिफलनादलिखितापि भित्तिः लिखितेव अवभासते । आलोकयतु देवो देवी च । इह हि—

ईक्षणध्यानसंस्पर्शप्रमुखैः पोषयन् प्रजाः ।
मत्स्यकूर्मविहंगादिविग्रहः प्रेक्ष्यते विभुः ॥६२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
विवेकः — अत्र किल विश्वतश्चित्रे विश्वचित्रे ।

अशुद्धसृष्टिविषयं भागं भवभृदाश्रयम् ।
अधिकप्रतिकोटिस्थं दृष्टिस्तव दिदृक्षते ॥६३॥

सुमतिः — मानुषस्य योगिनः मानुषसदृशे चित्तसंगः सम्पादनीयः । आर्यपुत्र ! किंनाम परमपुरुषस्य एतादृशानि रूपान्तराण्यपि भवन्ति ।

व्यवसायः—भवन्त्येव, तेषु एतदवलोक्यताम् ।

विवेकः — उभयोः विभूतिभूतं उभयविधं जगत् इत्युक्तं भवति ।

व्यवसायः—एवमेतत्, इतश्च दीयतां दृष्टिः देवेन । अत्र च----

परव्यूहव्यूहान्तरपदविभक्तेषु बहुषु
त्रिधान्मो रूपेषु स्थितिमनधिगम्यापि मनसः ।
अवैजात्यं वृन्दारकनरतिरश्चामभिनय-
त्यमुष्मिन् दृष्टिस्ते भवतु विभवव्यक्तिविभवे ॥

व्यवसायः—अमी च भृगुरघुयदुवंशसम्भवाः प्रबलतरदुष्टनिरसनेन परित्रातलोकत्रयास्त्रयो रामाः । एष पुनरेतेषु बहुमुखपुण्य-जनबाधनोऽपि परित्रातपुण्यजनो मध्यमो रामः । अनेन किल कोसलसुता कुमारभावकञ्चुकितकारणाकारेण, कौमार-केलिगोपायितकौशिकाध्वरेण, रणाध्वरधुर्यभव्यास्त्रशालिना,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
प्रणतजनविमतविमथनदुर्ललितदोर्ललितेन, मैथिलनगर-
सुलोचनालोचनचकोरचन्द्रेण, दिनकरकुलकमलदिवाकरेण
खण्डपरशुकोदण्डप्रकाण्डखण्डनशौण्डभुजदण्डेन, भृगुपति-
सुगतिविहतिकरनतपरुषिपरिघेण, पितृवचनपरिपालनप्रति-
ज्ञावज्ञातयौवराज्येन, दण्डकतपोवनजङ्गमपारिजातेन, खरतर-
खरतरुषण्डखण्डनचण्डपवनेन, द्विसप्तरक्षस्सहस्रनलवन-
विलोलनमहाकलभेन, महितमहामृथदर्शनमुदितमैथिलीदृढ-
परिरम्भणविरोपितविकटवीरव्रणेन, मारीचमायामृगचर्मपरि-
कर्मितनिर्भरदर्भास्तरणेन, गृध्रराजदेहदिधक्षालक्षितभक्तजन-
दाक्षिण्येन, अवन्ध्यमुनिजनभजनमुषितहृदयकलुषशबरी-
मोक्षसाक्षीभूतेन, प्रभञ्जनतनयभावुकभाषितरञ्जितहृदयेन,
तरणिसुतशरणागतिपरतन्त्रितस्वातन्त्र्येण, विपुलभुजमूल-
निबिडनिपीडितरावणरणरणकजनकचतुरुदधि विहरणचतुर-
कपिपतिहृदयविशालशिलातलदारण दारुण शिलीमुखेन,
विमतसहोदररक्षःपरिग्रहसंरम्भविजृम्भितसर्वेश्वरभावेन, सकृ-
त्प्रपन्नसंरक्षणदीक्षितसत्यव्रतेन, कपिकुलकरतलतुलितगिरि-
निकरसाधितसेतुपथसीमासीमन्तितसमुद्रेण, लङ्कावरोधवेपथु-
लास्यलीलोपदेशदेशिकेन, विशङ्कटविशिखविताडनविघटित-
मकुटविह्वलविश्रवस्तनयविश्रमसमयविश्राणनविख्यात-
विक्रमेण, कुम्भकर्णकुलगिरिदलनदम्भोलिना, मघवजिदभि-
हननकृदनुजसाक्षिकराक्षसद्वन्द्वयुद्धेन निखिलजगदनवरत-
Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भयजनकदशलपनलपनदशकलवनजनितकदनदलितरजनिचरयुवतिजनविलपनवचनविख्यापितपारम्येण, विभीषणवशंवदीकृतलङ्कैश्वर्येण, पुष्पकरभसगोष्पदीकृतगगनमहार्णवेन, प्रतिज्ञार्णवतरणकृतक्षणभरतमनोरथसिंहासनाधिरूढेन, दिव्यभौमायोध्याधिदैवतेन, जानकीसहधर्मचारिणा, सर्वधर्मसमाराधनीयेन, सनातनधर्मेण, साकेतजनपदजनिधानिकजङ्गमतदितरजन्तुजातदिव्यगतिदानदर्शितनित्यनिस्सीमवैभवेन भगवता, भक्तजनाभिरामेण, श्रीरामेण, विश्वमेतत्सनाथीकृतम्--

विवेकः —

इच्छामीन विहारकच्छप महापोतिन् यदृच्छाहरे
रक्षावामन रोषराम करुणाकाकुस्थ हेलाहलिन् ।
क्रीडावल्लव कल्किवाहनदशाकल्किन्निति प्रत्यहं
जल्पन्तः पुरुषाः पुनन्ति भुवनं पुण्यौघपण्यापणाः ॥
विशुद्धे विश्वरूपस्य यत्र क्वचन विग्रहे ।
समाधिजननीं पुंसः साधयिष्यामि भावनाम् ॥६५॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्यम् १०

(ततः प्रविशति महामोहः)

महामोहः—(विचिन्त्य) प्रिय! मया महासाहसिकस्य कुलघ्नस्य विवेकस्य विध्वंसने, कृतप्रतिज्ञेन समाधिसाकांक्षपुरुषसंक्षोभणाय कामक्रोधलोभदर्पदम्भादयः प्रेषिताः।

दुर्मतिः — आर्यपुत्र! पूर्वमेव ते तत्समीपं गताः।

दम्भादयः—वयममी आगताः।

मोहः — स्वागतं भवद्भ्यः।

दम्भः — महाराज, त्वत्प्रसादात् सर्वत्र अप्रतिहतगतयः समागताः स्मः। किं कर्तव्यमनेन किंकरजनेन?

मोहः — कामादीनां का वार्ता इदानीम्?

दम्भः — (स्वगतम्) किं राज्ञे विज्ञापयामि? (प्रकाशं) "सत्यं राजसु शोभते" इति प्रियेतरदपि दृष्टं ब्रवीमि—

अनन्तविषयस्पृहा जलधिसंप्लुते मानसे।
वसन्तसमये स्थिते मलयमारुते जीवति।
सकृद्वितततसौप्तिकप्रतिनिवृत्तिवैलक्ष्यतः
प्रसुप्त इव हन्त! न स्पृशति पञ्चबाणः शरान् ॥६६॥

अन्यस्मिन्नपि कैमुत्यसिद्धमावेदयामि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुरुषस्य विवेकविप्रलम्भात् स्वशरीरे ऽपि विरज्यमानबुद्धेः ।
कृपणप्रतिनन्दनीयवृत्तिः किमिवालम्बनमाश्रयेत लोभः ॥

दर्पः — देव ! अहं पुनः क्रोधस्य साम्प्रतिकीमवस्थां निवेदयामि ।

द्विसप्तदलपत्रलद्रुहिणसृष्टिभङ्गक्रिया
पुरस्कृतयुगक्षयभृकुटिताण्डवाडम्बरः ।
विरक्तिविषवल्लरीव्यतिकरेण रोषः स्वयं
प्रसुप्त इव वर्तते सुभटकेळिसौवस्तिकः ॥

मोहः —

धिग्ब्रह्माण्डकरण्डगह्वरकुटीकर्पूरपूरं यशः
धिग् ब्रह्मत्रिदशेन्द्रफालफलकस्पष्टोपमृष्टं पदम्
धिग् दोर्विक्रममद्भुतं मम पुनर्धिग्वादमेवास्तु
धिक् सोढा वैरिकथामपि स्वयमहं नीचाय मह्यं नमः

अहो ! विवेकस्य कुलघातिनो दुर्मन्त्रितमेतत् ।

कामस्ताम्यतु कोपलोभसहितः काले समभ्येतु वा
रक्षः संयति राघवास्थितिमहं व्यङ्ग्ता विवेकाहवे
कालस्येष रथोभवत्विह कलिस्त्वं सारथिर्दुर्मते
दम्भः सम्प्रति जैत्रदुन्दुभिरसौ दर्पस्तथा कंकटः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दम्भः — महाराज! स्वायत्तसिद्धेस्तव किमायत्तमस्मासु।

मोहः —

दम्भत्वमद्य नियतो निजधर्मगुप्त्यै
पुण्यापगा परिसरान्पुनराश्रयेथाः।
गाढोपलक्षितविरक्तिमदेषु दर्पः
तन्वीत वासमनघेषु तपोवनेषु।

दुर्मतिः — आर्यपुत्र! एवं मे राजकार्यं प्रतिभाति। संधिव्यपदेशे न अस्मत्सकाशमासाद्यतां विवेकः। तत्सजीवग्राहं गृहीत्वा दृढपीडनीयो भवेत्।

मोहः — (सोच्चैर्हासम्) मुग्धे! स्वप्नप्येवंविधं कातर्यवचनं मा वोचः। नन्वहं महामोहः! किमिदानीं मामन्यमिव अभिमन्यसे। प्रिये श्रुणु च एतन्महामोहस्य वीरव्रतम्।

क्रकचैः कृत्तदेहोऽपि दीपितोऽपि दवाग्निना।
न सूच्यग्रं प्रदास्यामि न संधास्यामि केनचित्॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्यम् ११

(ततः प्रविशति अभिनिवेशः)

अभिनिवेशः–

हृष्यन्ति व्यसनेषु सप्तसु मुधारम्भेषु मत्प्रेक्षिताः
प्रारब्धं न परित्यजन्ति च मुहुः प्रत्यूहवात्याहताः ।
नानादुःखभयानकेऽपि न जहत्यर्थे पुमर्थे रतिं
मोहंस्याभिनिवेश एकदृगहं कोशाधिकारे स्थितः ॥

अपि च लोभोऽपि महामोहसर्वस्वभूतो मामेव दर्शित सौभ्रात्रं सहायीकृत्य सर्वत्र विजयते । अहो! महत्सांपरायिकमुपस्थितमास्माकस्यान्ववायस्य यदिह विवेकेन प्रथममध्यात्मविद्यामशिक्षि पुरुषः। तथा च सपरिकरे मोक्षोपाये संमुखीकृतः। विमुखीकृताश्च कामक्रोधादयः। विमृष्टं च किमपि संयमस्थानम्। अवधारितं च धारणायाः शुभमालम्बनम्। आरिप्सितश्च शमदमवैराग्यादिपरिकर्मितः सालम्बनो महायोगः। (दीर्घं निश्वस्य)

विजिग्ये यैरिदं स्त्रीभिर्विजिताभिर्जगत्त्रयम् ।
त एव सुभटाः ख्याताः स्त्रीभिरेव जिगीषिताः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(नेपथ्ये) अलीकमेव भणति भावः ।

कासौ रण्डा ? मामप्यलीकवादिनं मन्यते ।

दुर्वासना—एतेनापि तव अलीकभाषितं प्रतिष्ठापितं; त्वयि जीवति अहं रण्डा किल ?

अभिनिवेशः—किमस्मद्गेहिनी ? शान्तं पापम् । प्रिये !

दुर्वा — आर्यपुत्र ! इयमस्मि । के पुरुषाः ? काभिर्जिगीषिताः ?

अभि — श्रूयतां, कामो जुगुप्सया, कोपः तितिक्षया, लोभः तुष्टया, अहंकारः आत्मविद्यया एवमन्येऽपि ।

दुर्वा — किमुत्साहमात्रेण कार्यं संघटते । हताशाः खल्वेताः शलभ्य इव आत्मविनाशे स्वयं प्रवृत्ताः ।

अभि — शलभीनिपाते प्रदीपोऽपि कदाचिद्विनाशमधिगच्छति । (कर्णं दत्वा) किं देवो महामोहः स्वयमेव समराय सन्नह्यति प्रिये ! महदत्याहितम् ,

अमुष्मिन्दिवसे श्वो वा नूनं नियतिवैभवात् ।
अमोहमविवेकं वा जगदेतद्भविष्यति ॥

तदस्माकं अवधानस्य प्रधानसमयः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्यम् १२

(ततः प्रविशति विवेकः)

विवेकः — सेनापते! अद्य खलु मया त्वत्पुरस्कारेण निर्जितः सर्वदोषप्रसूतिः महद्भिरपि दुर्जयो महामोहः ।

व्यवसायः—देव! वयं हि भवतो वाहनादिवत् उपकरणमात्रं, प्राधान्यं तु सर्वत्र भवत एव ।

विवेकः — स्वयंप्रवृत्तस्वतन्त्रकृत्ये किं परतन्त्रानस्मान् प्रशंससि ?

यथाधिकरणं प्रभुः यजनदानहोमार्चना
भरन्यसनभावनाप्रभृतिभिः समाराधितः ।
फलं दिशति देहिनामिति हि सम्प्रदायस्थितिः
श्रुतिस्मृतिगुरूक्तिभिर्नयवतीभिराभाति नः ॥

व्यवसायः—विक्रमादपि गरीयांस्तवासौ विनयगरिमा । इह पुनरिदानीं विश्वविख्यातवीरायितस्य ते विभूतिसमुचितं किमपि मङ्गलमाचरणीयम् ।

विवेकः — सेनापते! मैवं वादीः । अनिष्पन्नसमाधौ पुरुषे कथमहमभिषेक्तव्यः ? प्रक्रान्तमात्रा खल्विदानीं परब्रह्मोपलब्धिः परिनिष्पत्तिस्तु दुर्लभेति परिपश्यामि । तथाहि—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कथमद्य निरालम्बं कर्मशृङ्खलितः पुमान् ।
आरोहतु दुरारोहं समाधिगगनस्थलम् ॥

व्यवसायः—देव! पुरुषः खल्विदानीं स्वशरीरे स्वात्मबुद्धिं विहाय स्वात्मनि परशरीरत्वबुद्धिमनुरुन्धे।

विवेकः— हन्त! सिद्धप्रायमपि सर्वं सान्तःशल्यमिव अद्य संदृश्यते।

व्यवसायः—महाराज! किमिह पुनः प्रत्यूहशङ्कया?

विवेकः— सेनापते! सिद्धमपि सर्वं साध्यशेषावमर्शेन असत्कल्पमिवाभाति। अद्य हि—

अपि निर्मुक्तजीवानां कामादीनां बलीयसाम् ।
अविद्या कर्मसंज्ञा तु मृतसञ्जीविनी स्थिता ॥

व्यवसायः—महाराज! त्वत्प्रसादादेषापि न स्थास्यति।

विवेकः —

अहितनिवहवन्या हन्त सन्तन्यमाना
कथमियमपचेतुं कल्पकोट्यापि शक्या।

व्यवसायः—इत्यमेव।

दहति निरवशेषं देव! संभूतिरेनां
युगपदिह समिद्धो योगकल्पान्तवह्निः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपि च—

मुकुन्दे निक्षिप्य स्वभरमनघो मुक्तवदसौ
स्वतन्त्राज्ञासिद्धां स्वयमविदितस्वामिहृदयः।
परित्यागे सद्यः स्वपरविविधानर्थजननात्
अलङ्घ्यामामोक्षादनुसरति शास्त्रीयसरणिम्॥

विवेकः — सेनापते! सम्प्रधारयतापि त्वदुक्तं त्वराधिक्यात् प्रचलितेनेव मया नानुभूयते। यावदिह पुरुषस्य निश्रेयसोपायमविकलं न निष्पादयामि, यावद्वा प्रियाऽप्रियेषु सुकृतदुष्कृते न संक्रमयामि, न तावन्निद्रामाद्रिये। अद्य तु—

कामातङ्कमतीत्य कोपदहनं निर्वाप्य वित्तस्पृहा-
वेताळीं व्यवधूय बान्धवकथागर्तं समुत्तीर्य च।
सङ्गोत्तंसितवासनासहचरः संसारकाराकुटी-
निष्क्रान्तिक्रमपादुकातनुमनुद्विग्नो मुनिः क्षाम्यति॥

व्यवसायः—मैवमाशङ्केथाः----

स्वापोद्बोधव्यतिकरनिभे भोगमोक्षान्तराले
कालं कंचिज्जगति विधिना केनचित् स्थाप्यमानाः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्त्वोपायप्रभृतिविषये स्वामिदत्तां स्वनिष्ठाम्
शेषां कृत्वा शिरसि कृतिनः शेषमायुर्नयन्ति ॥

शान्तमेव रसमेकं शरणयतो पुनरपि सम्प्रति रसान्तराण्यपि पुष्णातीव विष्णुभक्तिः । तथा हि----

जुगुप्सां देहादौ विषयरसभोगेषु हसनं
प्रकोपं निद्रादौ परपरुषवादादिषु भयम् ।
शुचं योगालाभे फलपरिणतौ विस्मयमपि
प्रयच्छत्युत्साहं दुरितविरतौ ब्रह्मणि रतिम् ॥



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्यम् १३

(ततः प्रविशतः नारदतुम्बुरू)

नारदः — सखे ! चिरप्रार्थितमहासमरसंदर्शनेन सन्तोषितं चक्षुः तदिह भवता परिविवाहयिषितहर्षप्रकर्षेण विश्वेषु भुवनेषु विवेकविजयः विश्रावयितव्यः।

तुम्बुरुः — यथाऽज्ञापयति !

नारदः — अहं तु प्रशमितप्रतिपक्षं स्ववशीकृतहृषीकगणं सुमतिसहायं महाराजं समयोपनतसार्वभौमपदाभिषेकं सौस्नातिकवृत्त्या सम्भाव्य, समाधिसप्ततन्तुसहायेन सन्तोषयितुमिच्छामि।

विवेकः — अद्य खलु वयमनुगृहीताः स्मः। सञ्जीवनी खलु भवादृशां वागमृतवृत्तिः। भगवन् !

लुप्तदृष्टिभिरलब्धदेशिकैर्लोकवेदपदवी दुरत्यया।
तत्प्रसीद भगवन् मदीप्सितं पुण्डरीकमिव पाहि मन्त्रतः

नारदः — यतिष्ये चाहं यथासारम्—

अधिकमिह मुमुक्षोरागमग्राह्यवर्गात्
स्वयमिह गुरुभक्त्या दर्शितं स्वानुभूतौ।
प्रथयति मयि सौम्य त्वन्निदेशेन मन्ये
सपदि भवति लग्ने गाढलग्नस्समाधिः॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अप्रतिहतमनोरथः पुरुषमपवर्गे स्थापयेथाः ।

विवेकः — सेनापते! संप्रति सिद्धप्रायं समाधिमुत्पश्यामि ।

षडङ्गमथवाष्टाङ्गं समाधिमधिरोक्ष्यतः ।
अवलम्बनमक्षुद्रा दयैका दानवद्रुहः ॥

तयैव गाढालिङ्गितोऽसौ पुरुषः इदानीमालक्ष्यते । इह हि

विषयमदिरामुग्धैस्त्यक्तस्स एष पृथग्जनैः
क्वचन समये यत्रैकाग्र्यं क्वचिच्च तदास्पदे ।
निभृतकरणग्रामस्तृप्यन् निरुद्धमरुद्गणः
परमिह परे धाम्नि प्रत्यङ्मुखः प्रतितिष्ठति ॥

तदहमपि यावत्पुरुषं कृतकृत्यं कृतार्थं च निर्धारयामि ।

अविकलबहुमत्या सेवितोऽहं सुमत्या
नियतिमनतिलङ्घ्यां निर्ममस्सान्त्वयामि ।
त्वरयितुमिह देवीं त्वन्मते विष्णुभक्तिं
गणयितुमपि सिद्धिं गच्छ सेनापते त्वम् ॥

व्यवसायः—यदाज्ञापयति देवः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्यम् १४

(ततः प्रविशति विष्णुभक्तिः)

अम्बा मे पुरुषस्य बुद्धिरनघा तातस्स धर्मोत्तरः
सन्तुष्टिस्सहजा क्षमा प्रियसखी सद्वृत्तिराज्ञाकरी ।
विद्यैव स्वयमस्मि विश्ववृजिनप्रध्वंसनं क्रीडितं
साऽहं प्राणिमि विष्णुभक्तिरचला संतिष्ठते संसृतिः ॥

निरुध्य तरसा मरुत्करणमण्डलीं कुण्डलीं
विचिन्त्य विगणय्य वा धमनिधातुमर्मादिकम् ।
किमत्र निगमत्रयस्थितिमताऽपि वा लभ्यते
मयि स्थितिरवस्थिता यदि किमुच्यते मुच्यते ॥

यश्चासौ निवृत्तिधर्मकाष्ठाभूतो नैश्रयसो योगः उच्यते सोऽपि मदनुरोधादेव महतीं सिद्धिमापादयति । अद्य च----

कामादिकेष्वपगतेषु कथावशेषं
सम्प्रत्यसौ शमदमादिगुणोपपन्नः ।
मैत्रीदयादिपरिकर्मविभूषितेन
श्रद्धाधनेन मनसा लभते समाधिम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ततश्च---

वैकुण्ठकृपया देव्या मदभीष्टे व्यवस्थितम् ।
प्राध्वं सङ्कल्पमार्तण्डं प्रवर्तयितुमुत्सहे ॥

अतस्तामेव तावदापतिष्ठे । अद्य पुनः मातेव स्तनन्धयाना-
मभिरक्षणे पक्षपातिनी भवती ।

फलवितरणदक्षं पक्षपातानभिज्ञं
प्रगुणमनुविधेयं प्राप्य पद्मासहायम्
महति गुणसमाजे मानपूर्वं दये त्वं
प्रतिवदसि यथार्हं पाप्मनां मामकानाम् ॥

(इति निष्क्रान्ता)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्यम् १५

(ततः प्रविशति संकल्पः)

आत्मानं निर्वर्ण्य

यस्मिन् विस्मयनीयभूमनि मनागुन्मीलितेनैकधा
सिध्यन्त्यस्य सिताऽसितस्य जगतः स्वर्गापवर्गादयः।
ऐशस्सोहमवासरात्ययभवन्मायामहायामिनी
सत्ताशेषसुषुप्तबोधनपटुः सङ्कल्पसूर्योदयः ॥

आदिष्टोऽस्मि देव्या भगवदनुकम्पया। यथा विवेकेन विनिष्पन्नसमाधिः पुरुषः त्वयैव मोचनीय इति। अद्य तु

अनिदंप्रथमां निद्रां विनिवर्त्य क्षणादहम्।
अनिदंपश्चिमां पुंसो जनयिष्यामि जागराम् ॥

तदर्थमपि तावदिदमिदानीमाददीय। यदुत—

मयि विनिहितभारं मध्यमे वृत्तिभेदे
स्थिरमनसमुपायापायरथ्यानिवृत्तम्।
मुरमथनसमीक्षाशेखरेण स्वभूम्ना
मुषितनिखिलदोषं मोचयिष्यामि जीवम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विष्णुभक्तिः--अहो देव! यदहमिदानीं भवतैव भावनीयं प्रहर्षपरवशा प्रत्यभिज्ञापयामि। अद्य हि---

प्रकृतः क्रियया धिया च योगः परमैकान्त्यपरिष्कृतस्य पुंसः
निधिदर्शनवन्निरूढहर्षं प्रणिधत्ते विशदं परप्रकाशम् ॥

सङ्कल्पः — अहो महदिदमाश्चर्यम्।

शृङ्गारवीरकरुणाद्भुतहास्यभीति-
बीभत्सरौद्रविषयानतिवर्तमानः।
तत्त्वावलोकनविभावसमेधितात्मा
शान्तो रसः स्फुरति मूर्त इवैष धन्यः ॥

विष्णुभक्तिः--अयं तावदिदानीमान्तरस्य योगस्य परिपाकः बाह्यस्य चैतादृशीं दशामनुभवति पुरुषः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्यम् १६

(ततः प्रविशति पुरुषः)

पुरुषः — देव ! भवत्प्रसादसंभवेयं पराङ्मुखस्वभावस्य मे प्रत्यङ्मुखी बुद्धिवृत्तिः ।

क्रियाशक्तिं केचिद्दनुजमथनीं हेतिमपरे
मनस्तत्त्वं चान्ये मधुविजयिनस्त्वामभिदधुः ।
तमेवैके तत्तत्पदविषयजुष्टं तदिह नः
सदोत्तुङ्गः प्रादुर्भवसि भवसिन्धुप्रमथनः ॥

सङ्कल्पः — भद्र !

दहरकुहरे देवस्तिष्ठन्निषद्वरदीर्घिका
निपतितनिजापत्यादित्सावतीर्णपितृक्रमात् ।
धमनिमिह नस्तस्मिन् काले स एव शताधिकाम्
अकृतकपुरःप्रस्थानार्थं प्रवेशयति प्रभुः ॥

विवेकः — महायोगेश्वरि !

किं विज्ञानैः किं तपोदानयज्ञैः
किं वान्यैश्च त्वत्परित्यागदीनैः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ज्ञातुं द्रष्टुं तत्त्वतश्च प्रवेष्टुं
शक्यं ब्रह्मानन्यभाजा त्वयैव ॥

भगवति! विश्वसाक्षात्कारविचक्षणायाः, किमेतावत् परिमितातिशयदर्शनमाश्चर्यम् ।

विष्णुभक्तिः--किञ्चिदचिन्त्यमहिमशालिनि अमुष्मिन्महात्मनि अद्भुतमवलोकयामि ।

कृतमिह दुरितं प्रमादवृत्त्या किमपि मुकुन्दकृपानिमग्नमेनम् ।
पवनतनयवालवह्निनीत्या न दहति धक्ष्यति योजितं परेषु ॥

भवत्वेतदेवं निष्प्रत्यूहभगवदनुकम्पावलम्बितः पुरुषः सर्वदोषाकरं संसारसागरं निस्तरति, प्रविशति च परमं पदम् । किं ते भूयः प्रियमुपहरामि ?

विवेकः — भगवति महानुभावे!

किं तत्प्रियं परमतः प्रतिपादनीयं
पद्मासहायपदपद्मजुषा भवत्या ।
पश्यामि पत्युरुषसेव पतत्पतङ्गं
राकाशशाङ्कमिव राहुमुखाद्विमुक्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथापीदमस्तु भरतवाक्यम् ।

अङ्गीकुर्वन्त्वकलुषधियो नित्यमध्यात्मविद्याम्
आद्यो धर्मः स्पृशतु वसुधामाशिषः पारवर्ती ।
देवः श्रीमान् निरवधिदयासिन्धुरस्मिन् प्रबन्धे
वक्ता श्रोता वचनविषयः प्रीयतां वासुदेवः ॥

Bhawan's Sri Samkaracharya Sanskrit Mahavidyalaya
790

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

433.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

copies apply to :

SRI RAMA PRESS

Ranga Rao Road, Shankarapuram,

BANGALORE 4.

Funding by IKS-MoE